## समानकर्तृकेषु तुमुन् । (१५८/३१७६)

इच्छार्थेषु [1]धातुषु समानकर्तृकेषु उपपदेषु धातोः तुमुन् प्रत्ययो भवति । तुमुन्प्रकृत्यपेक्षमेव [2]समानकर्तृत्वम् । इच्छति भोक्तुम् । कामयते भोक्तुम् । वष्टि भोक्तुम् । [3]वाञ्छति भोक्तुम् । समानकर्तृकेषु इति किम् ? देवदत्तं भुञ्जानमिच्छति यज्ञदत्तः । इह कस्मान्न भवति, इच्छन् करोति[4] ? अनभिधानात् ॥

## लिङ् च । (१५९/२८१५)

[5]इच्छार्थेषु समानकर्तृकेषु धातुषूपपदेषु धातोः लिङ [6]प्रत्ययो भवति । भुञ्जीय इति इच्छति । [7]अधीयीयेति इच्छति । क्रियातिपत्तौ लृङ भवति । योगविभाग उत्तरार्थः ॥

## इच्छार्थेभ्यो विभाषा वर्तमाने । (१६०/२८१६)

इच्छार्थेभ्यो धातुभ्यो [8]वर्तमाने काले विभाषा लिङ प्रत्ययो भवति । [9]लटि प्राप्ते वचनम् । इच्छति, इच्छेत् । वष्टि, उश्यात् । कामयते, कामयेत ॥

## विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् । (१६१/२२०८)

विधिः [10]प्रेरणम् । निमन्त्रणम् नियोगकरणम् । आमन्त्रणम् कामचारकरणम् । अधीष्टः सत्कारपूर्वको व्यापारः । सम्प्रश्नः सम्प्रधारणम् । प्रार्थनम् याच्ञा । विध्यादिष्वर्थेषु[11] धातोः लिङ प्रत्ययो भवति । [12]सर्वलकाराणामपवादः । विध्यादयश्च [13]प्रत्ययार्थविशेषणम् । विध्यादिविशिष्टेषु कर्त्रादिषु लिङ [14]प्रत्ययो भवति । विधौ तावत् – कटं कुर्यात्[15] । ग्रामं [16]भवानागच्छेत् । निमन्त्रणे – इह भवान् भुञ्जीत । इह भवानासीत । आमन्त्रणे – इह भवानासीत । इह भवान् भुञ्जीत । अधीष्टे – [17]अधीच्छामो भवन्तं माणवकं [18]भवानुपनयेत् । [19]सम्प्रश्ने – किं नु खलु भो व्याकरणमधीयीय । प्रार्थने – [20]भवति मे प्रार्थना व्याकरणमधीयीय[21] ॥

## लोट् च । (१६२/२१०४)

लोट् प्रत्ययो भवति [22]धातोः विध्यादिषु अर्थेषु । योगविभाग उत्तरार्थः । [23]विधौ तावत् – कटं [24]तावत् भवान् करोतु । ग्रामं [25]भवानागच्छतु । निमन्त्रणे – अमुत्र भवानास्ताम् । [26]अमुत्र भवान् भुङ्क्ताम् । आमन्त्रणे – इह भवान् भुङ्क्ताम् । अधीष्टे – [27]अधीच्छामो भवन्तं माणवकं भवानध्यापयतु, माणवकं भवानुपनयताम् । सम्प्रश्ने – किं नु खलु भो व्याकरणमध्ययै । प्रार्थने – [28]भवति मे प्रार्थना व्याकरणमध्ययै, छन्दोऽध्ययै ॥

---

1. धातुषु नास्ति फ. ह. 2. समानकर्तृकत्वात् द्रष्टव्यम् ब. 3. उदाहरणमिदं नास्ति फ. 4. इति इत्यधिकम् फ. 5. इच्छार्थेषु नास्ति ह. 6. प्रत्ययो नास्ति फ. 7. उदाहरणमिदं नास्ति फ. 8. वर्तमानकाले ह. 9. वाक्यमिदं नास्ति ह. 10. प्रेषणा फ, प्रेषणम ह. 11. गम्यमानेषु इत्यधिकम् ह. 12. वाक्यमिदं नास्ति क. 13. एते इत्यधिकम् फ, वाक्यमिदं नास्ति ह. 14. प्रत्ययो नास्ति ह. 15. भवान् इत्यधिकम् ह. फ. 16. भवान् गच्छेत् फ. 17. अध्येष्यामहे ह. 18. भवानध्यापयेत् ह. 19. उपसंप्रश्ने ह. 20. भवन्तं प्रार्थये फ. 21. छन्दोऽधीयीय इत्यधिकम् फ. ह. 22. धातोः नास्ति ह. 23. विधिः फ. 24. तावत् नास्ति फ. ह. 25. भवान् नास्ति फ. ह. 26. उदाहरणमिदं नास्ति फ. 27. अध्येष्यामहे ह. 28. भवन्तं प्रार्थये फ.